# শ্রীরাঘবংেদ্রস্তাোত্রম্

শ্রীপূর্ণবাোধগুরুতীর্থপযাোব্ধপািরা কামারমািক্ষবিষমাক্ষশিরিঃ স্পৃশংতী ।
পূর্বাোত্তরামিততরঙ্গচরত্সুহংসা দবোি□ইসবেতিপরাঙ্ঘ্রপিযাোজলগ্না ॥ ১ ॥

জীবশেভদেগুণপূর্তিজগত্সুসত্ত্ব নীচাোচ্চভাবমুখনক্রগণৈঃ সমতো ।
দুর্বাদ্যজাপতিগিি□ঐর্গুরুরাঘবংেদ্রবাগ্দবেতাসরিদমুং বমিলীকরাোতু ॥ ২ ॥

শ্রীরাঘবংেদ্রঃ সকলপ্রদাতা স্বপাদকঞ্জদ্বযভক্তমিদ্ভ্যঃ ।
অঘাদ্রিসম্ভদেনদৃষ্টবিজ্রঃ ক্ষমাসুরংেদ্রাোহবতু মাং সদাঽযম্ ॥ ৩ ॥

শ্রীরাঘবংেদ্রাোহরপিাদকঞ্জনষিবেণাল্লব্ধসমস্তসম্পত্ ।
দবেস্বভাবাো দবিজিদ্রুমাোহযমষি্টপ্রদাো মে সততং স ভূযাত্ ॥ ৪ ॥

ভব্যস্বরূপাো ভবদুঃখতূলসঙ্ঘাগ্নচির্যঃ সুখধরৈ্যশালী ।
সমস্তদুষ্টগ্রহনগি্রহশোো দুরত্যযাোপপ্লবসিংধুসতেুঃ ॥ ৫ ॥

নরিস্তদাোষাো নরিবদ্যবষেঃ প্রত্যর্থমিূকত্ত্বনদিানভাষঃ ।
বদি্বত্পরজি্ঞযেমহাবশিষোো বাগ্বখৈরীনর্জিতভিব্যশষেঃ ॥ ৬ ॥

সংতানসম্পত্পরশিুদ্ধভক্তবিজি্ঞানবাগ্দহেসুপাটবাদীন্ ।
দত্ত্বা শরীরাোত্থসমস্তদাোষান্ হত্ত্বা স নাোঽব্যাদ্গুরুরাঘবংেদ্রঃ ॥ ৭ ॥

যত্পাদাোদকসঞ্চযঃ সুরনদীমুখ্যাপগাসাদিতা-
সঙ্খ্যাঽনুত্তমপুণ্যসঙ্ঘবিলসত্প্রখ্যাতপুণ্যাবহঃ ।
দুস্তাপত্রযনাশনাো ভুবি মহাবংধ্যাসুপুত্রপ্রদাো
ব্যঙ্গস্বঙ্গসমৃদ্ধদিাো গ্রহমহাপাপাপহস্তং শ্রযে ॥ ৮ ॥

যত্পাদকঞ্জরজসা পরভিূষতিাঙ্গা যত্পাদপদ্মমধুপাযতিমানসা যে ।
যত্পাদপদ্মপরকিীর্তনজীর্ণবাচস্তদ্দর্শনং দুরতিকাননদাবভূতম্ ॥ ৯ ॥

সর্বতংত্রস্বতংত্রাোহসে ৌ শ্রীমধ্বমতবর্ধনঃ ।
বজিযীংদ্রকরাব্জাোত্থসুধীংদ্রবরপুত্রকঃ ।
শ্রীরাঘবংেদ্রাো যতরিাট্ গুরুর্মে স্যাদ্ভযাপহঃ ॥ ১০ ॥

জ্ঞানভক্তসিুপুত্রাযুঃ যশঃ শ্রীপুণ্যবর্ধনঃ ।
প্রতবিাদজিযস্বাংতভদেচহ্নিাদরাো গুরুঃ ।
সর্ববদি্যাপ্রবীণাোহন্যাো রাঘবংেদ্রান্নবদি্যতে ॥ ১১ ॥

অপরাোক্ষীকৃতশ্রীশঃ সমুপক্ষেতিভাবজঃ ।
অপক্ষেতিপ্রদাতাঽন্যাো রাঘবংেদ্রান্নবদি্যতে ॥ ১২ ॥

দযাদাক্ষিণ্যবৈরাগ্যবাক্পাটবমুখাঙ্কিতঃ ।
শাপানুগ্রহশক্তোঽন্যো রাঘবেংদ্রান্নবিদ্যতে ॥ ১৩ ॥

অজ্ঞানবিস্মৃতিভ্রাংতিসংশযাপস্মৃতিক্ষযাঃ ।
তংদ্রাকম্পবচঃকৌংঠ্যমুখা যে চেংদ্রিযোদ্ভবাঃ ।
দোষাস্তে নাশমাযাংতি রাঘবেংদ্রপ্রসাদতঃ ॥ ১৪ ॥

ওঁ শ্রী রাঘবেংদ্রায নমঃ ইত্যষ্টাক্ষরমংত্রতঃ ।
জপিতাদ্ভাবিতান্নিত্যং ইষ্টার্থাঃ স্যুর্নসংশযঃ ॥ ১৫ ॥

হংতু নঃ কাযজান্দোষানাত্মাত্মীযসমুদ্ভবান্ ।
সর্বানপি পুমর্থাংশ্চ দদাতু গুরুরাত্মবিত্ ॥ ১৬ ॥

ইতি কালত্রযে নিত্যং প্রার্থনাং যঃ করোতি সঃ ।
ইহামুত্রাপ্তসর্বেষ্টো মোদতে নাত্র সংশযঃ ॥ ১৭ ॥

অগম্যমহিমা লোকে রাঘবেংদ্রো মহাযশাঃ ।
শ্রীমধ্বমতদুগ্ধাব্ধিচংদ্রোঽবতু সদাঽনঘঃ ॥ ১৮ ॥

সর্বযাত্রাফলাবাপ্ত্যৈ যথাশক্তিপ্রদক্ষিণম্ ।
করোমি তব সিদ্ধস্য বৃংদাবনগতং জলম্ ।
শিরসা ধারযাম্যদ্য সর্বতীর্থফলাপ্তযে ॥ ১৯ ॥

সর্বাভীষ্টার্থসিদ্ধ্যর্থং নমস্কারং করোম্যহম্ ।
তব সঙ্কীর্তনং বেদশাস্ত্রার্থজ্ঞানসিদ্ধযে ॥ ২০ ॥

সংসারেঽক্ষযসাগরে প্রকৃতিতোঽগাধে সদা দুস্তরে ।
সর্বাবদ্যজলগ্রহৈরনুপমৈঃ কামাদিভঙ্গাকুলে ।
নানাবিভ্রমদুর্ভ্রমেঽমিতভযস্তোমাদিফেনোত্কটে ।
দুঃখোত্কৃষ্টবিষে সমুদ্ধর গুরো মা মগ্নরূপং সদা ॥ ২১ ॥

রাঘবেংদ্রগুরুস্তোত্রং যঃ পঠেদ্ভক্তিপূর্বকম্ ।
তস্য কুষ্ঠাদিরোগাণাং নিবৃত্তিস্ত্বরযা ভবেত্ ॥ ২২ ॥

অংধোঽপি দিব্যদৃষ্টিঃ স্যাদেডমূকোঽপি বাক্পতিঃ ।
পূর্ণাযুঃ পূর্ণসম্পত্তিঃ স্তোত্রস্যাস্য জপাদ্ভবেত্ ॥ ২৩ ॥

যঃ পিবেজ্জলমেতেন স্তোত্রেণৈবাভিমংত্রিতম্ ।
তস্য কুক্ষিগতা দোষাঃ সর্বে নশ্যংতি তত্ক্ষণাত্ ॥ ২৪ ॥

যদ্বৃংদাবনমাসাদ্য পঙ্গুঃ খঞ্জোঽপি বা জনঃ ।
স্তোত্রেণানেন যঃ কুর্যাত্প্রদক্ষিণনমস্কৃতি ।

স জঙ্ঘালো ভবেদেবে গুরুরাজপ্রসাদতঃ ॥ ২৫ ॥

সোমসূর্যোপরাগে চ পুষ্যার্কাদিসমাগমে ।
যোঽনুত্তমমিদং স্তোত্রমষ্টোত্তরশতং জপেত্ ।
ভূতপ্রেতপিশাচাদিপীডা তস্য ন জাযতে ॥ ২৬ ॥

এতত্স্তোত্রং সমুচ্চার্য গুরোর্বৃংদাবনাংতিকে ।
দীপসংযোজনাজ্জ্ঞানং পুত্রলাভো ভবেদ্ধ্রুবম্ ॥ ২৭ ॥

পরবাদিজযো দিব্যজ্ঞানভক্ত্যাদিবর্ধনম্ ।
সর্বাভীষ্টপ্রবৃদ্ধিস্স্যান্নাত্র কার্যা বিচারণা ॥ ২৮ ॥

রাজচোরমহাব্যাঘ্রসর্পনক্রাদিপীডনম্ ।
ন জাযতেঽস্য স্তোত্রস্য প্রভাবান্নাত্র সংশযঃ ॥ ২৯ ॥

যো ভক্ত্যা গুরুরাঘবেংদ্রচরণদ্বংদ্বং স্মরন্ যঃ পঠেত্ ।
স্তোত্রং দিব্যমিদং সদা নহি ভবেত্তস্যাসুখং কিঞ্চন ।
কিং ত্বিষ্টার্থসমৃদ্ধিরেব কমলানাথপ্রসাদোদযাত্ ।
কীর্তির্দিগ্বিদিতা বিভূতিরতুলা সাক্ষী হযাস্যোঽত্র হি ॥ ৩০ ॥

ইতি শ্রী রাঘবেংদ্রার্য গুরুরাজপ্রসাদতঃ ।
কৃতং স্তোত্রমিদং পুণ্যং শ্রীমদ্ভির্হ্যপ্পণাভিদৈঃ ॥ ৩১ ॥

ইতি শ্রী অপ্পণ্ণাচার্যবিরচিতং শ্রীরাঘবেন্দ্রস্তোত্রং সম্পূর্ণম্

ভারতীরমণমুখ্যপ্রাণান্তর্গত শ্রীকৃষ্ণার্পণমস্তু

www.YouSigma.com